# Sharadeyavratanirupanam

# શારદેયવ્રતનિરૂપણમ્

## Document Information

Text title : Sharadeyavratanirupanam

File name : shAradeyavratanirUpaNam.itx

Category : devii, devI, lakShmInArAyaNIyasaMhitA

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 138/54-75||

Latest update : April 12, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

April 12, 2026

*sanskritdocuments.org*

# શારદેયવ્રતનિરુપણમ્

શ઼ૃણુ લક્ષ્મિ વ્રતં તેઽન્યચ્છારદેયવ્રતોત્તમમ્ ।
બૃહસ્પતેસ્તુ દિવસે કર્તવ્યં પૂજનં તવ ॥ ૫૪॥

મણ્ડપં સુભગં કૃત્વા તોરણાદિસમન્વિતમ્ ।
સૌવર્ણકલશૈર્ધાન્યૈશ્ચાસનાદિભિરુર્જિતમ્ ॥ ૫૫॥

તન્મધ્યે કારયેદ્રમ્યં ગજાસનં સુવર્ણજમ્ ।
તત્ર પીઠે સ્થાપયેચ્ચ શારદાખ્યાં રમાં સતીમ્ ॥ ૫૬॥

દ્વિભુજાં લલિતાલક્ષ્મીં સર્વાભરણભૂષિતામ્ ।
વીણાકમલહસ્તાં ચ મુકુટાદિસુશોભનામ્ ॥ ૫૭॥

અથ પાર્શ્વે સ્થાપયેચ્ચ ગાયત્રીં ચ સરસ્વતીમ્ ।
વાદ્યયુક્તાં દિવ્યરૂપાં વેદપુસ્તકધારિણીમ્ ॥ ૫૮॥

એવં દેવીત્રયં તત્ર પૂજયેદ્ગન્ધકુઙ્કુમૈઃ ।
અક્ષતૈઃ શ્વેતપુષ્પાદ્યૈર્ધૂપદીપાઽઽદિવસ્તુભિઃ ॥ ૫૯॥

ક્ષીરં ચ પાયસં સિદ્ધાન્નં મિષ્ટં ભોજયેત્તથા ।
મિષ્ટવારિ સુગન્ધાઢ્યં પાયયેચ્છીતલં તથા ॥ ૬૦॥

તામ્બૂલકં પ્રદદ્યાચ્ચ નીરાજનં તતશ્ચરેત્ ।
પ્રાર્થયેચ્છારદાલક્ષ્મીં વાણી મે પ્રીયતામિતિ ॥ ૬૧॥

કૃપયા તે ભવિષ્યામિ વિદ્યાવારિનિધિઃ પરઃ ।
રસનાગ્રે મમ નિત્યં સરસ્વતી વસત્વપિ ॥ ૬૨॥

ઇહ લોકે સદાઽઽનન્દમવાપ્નુયાં તથા કુરુ ।
વેદાઃ શાસ્ત્રાણિ શસ્ત્રાણિ ગીતનૃત્યાદિકં ચ યત્ ॥ ૬૩॥

ન વિહીનં ત્વયા વાણિ તથા મે સન્તુ સિદ્ધયઃ ।
વાણી મેધા ધરા પુષ્ટિર્ગૌરી તુષ્ટિઃ પ્રભા મતિઃ ॥ ૬૪॥

એતાભિઃ પાહિ ચાષ્ટાભિસ્તનૂભિર્માં નરાયણિ ।
એવં સમ્પ્રાર્થ્ય દાનાનિ દદ્યાત્ પુષ્પાઞ્જલિં તથા ॥ ૬૫॥

ભોજયેદ્બાલબાલાશ્ચ સાધુસાધ્વીશ્ચ યોષિતઃ ।
ધનવસ્ત્રાણિ દદ્યાચ્ચ કમણ્ડલું ચ પુસ્તકમ્ ॥ ૬૬॥

વાદ્યદાનં પ્રકુર્વીત શ‍ૃઙ્ગારાભરણાર્પણમ્ ।
પરિહારં પ્રકુર્વીત ગુરવે શ્રિયમર્પયેત્ ॥ ૬૭॥

મૌનવ્રતેન ભુઞ્જીત સાયં પ્રાતશ્ચ વૈ વ્રતી ।
ગુરુવારે પ્રતિમાસં માસાસ્ત્રયોદશ વ્રતમ્ ॥ ૬૮॥

સન્ધ્યાયાં ચ તથા મૌનં રક્ષન્ વ્રતી સમાચરેત્ ।
નાઽન્તરા ભોજનં કુર્યાત્સમાપ્તે ચ વ્રતે તતઃ ॥ ૬૯॥

ઉદ્યાપનં પરં કુર્યાન્મહોત્સવસમન્વિતમ્ ।
વસ્ત્રયુગ્મં સ્ત્રિયૈ દદ્યાદ્વિપ્રાયૈ ભોજનાન્વિતમ્ ॥ ૭૦॥

ગોદાનં ગૃહદાનં ચ કુર્યાદ્યથાધનં વ્રતી ।
અનેન વિધિના કૃત્વા પાયસાદિ પ્રભોજનમ્ ॥ ૭૧॥

વિદ્યાવાન્ ધનવાન્ મિષ્ટકણ્ઠો વ્રતી પ્રજાયતે ।
શારદાયાઃ પ્રસાદેન બ્રહ્મલોકે મહીયતે ॥ ૭૨॥

નરો નારી કુમારી વા કુરુતે શારદાવ્રતમ્ ।
બ્રહ્મલોકે વસેદ્બ્રાહ્મી યાવત્કલ્પાયુતત્રયમ્ ॥ ૭૩॥

વિદ્યાદાનં પ્રકુર્યાદ્યો વ્રતં કૃત્વા ધનાર્પણૈઃ ।
વિદ્વાન્ વિદ્યાં પ્રદદ્યાચ્ચ શારદાવ્રતવાંશ્ચ યઃ ॥ ૭૪॥

વિદ્યાધરપુરે સોઽપિ વસેત્કલ્પાઽયુતત્રયમ્ ।
અન્તે લક્ષ્મીપુરં યાતિ બ્રહ્માઽક્ષરં વ્રજેત્તતઃ ॥ ૭૫॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ દ્વાપરયુગસન્તાનાત્મકસ્ય તૃતીયખણ્ડે
૧૩૮-અધ્યાયાન્તર્ગતં શારદેયવ્રતનિરૂપણં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૩। અધ્યાય ૧૩૮/૫૪-૭૫॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 138/54-75..

Proofread by PSA Easwaran

*Sharadeyavratanirupanam*

pdf was typeset on April 12, 2026

Please send corrections to *sanskrit@cheerful.com*